## औक्षमनपत्ये। (१७३/११५९)

औक्षम् इति अनपत्येऽणि टिलोपो निपात्यते। औक्षं पदम्। अनपत्ये इति किम्? उक्ष्णोऽपत्यम् औक्ष्णः। 'षपूर्वहन्धृतराज्ञामणि' (६.४.१३५/११६०) इत्यल्लोपः॥

## दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवासिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि। (१७४/११४५)

[1]दाण्डिनायन हास्तिनायन आथर्वणिक जैह्माशिनेय वासिनायनि भ्रौणहत्य धैवत्य सारव ऐक्ष्वाक मैत्रेय हिरण्मय इत्येतानि निपात्यन्ते।

दण्डिन् हस्तिन् इत्येतौ नडादिषु (४.१.९९/११०३) पठ्येते, तयोरायने परतः प्रकृतिभावो निपात्यते। केषांचित्तु हस्तिन् इति नडादिषु न पठ्यते, तेषामत एव निपातनात् फगपि भवति। दण्डिनोऽपत्यं दाण्डिनायनः। हस्तिनोऽपत्यं हास्तिनायनः।

अथर्वन् इति [2]वसन्तादिषु (४.२.६३/१२७३) पठ्यते। अथर्वणा प्रोक्तो ग्रन्थोऽपि उपचारात् अथर्वन् इति उच्यते, तमधीते यः स आथर्वणिकः। इके प्रकृतिभावो निपात्यते।

जिह्माशिन् इति शुभ्रादिषु (४.१.१२३/११२६) पठ्यते, तस्य ण्ये परतः प्रकृतिभावो निपात्यते। जिह्माशिनोऽपत्यं जैह्माशिनेयः।

वासिनोऽपत्यम्। 'उदीचां वृद्धादगोत्रात्' (४.१.१५७/११८१) इति फिञ्। तत्र प्रकृतिभावो निपात्यते। वासिनायनिः।

भ्रूणहन्, धीवन् इत्येतयोः ष्यञि परतः तकारादेशो निपात्यते। भ्रूणघ्नः भावः भ्रौणहत्यम्। धीव्नः भावः धैवत्यम्। 'हनस्तोऽचिण्णलोः' (७.३.३२/२५७४) इति यत् तत्वं तद् धातुप्रत्यय एव इति भ्रौणघ्नः, वार्त्रघ्नः इत्यत्र न भवति, अतः [3]भ्रौणहत्ये तत्वं निपात्यते।

सारव इति सरयू इत्येतस्य अणि परतो [4]यूशब्दस्य व इत्यादेशो निपात्यते। सरय्वां भवं सारवम् उदकम्।

ऐक्ष्वाक इति स्वरसर्वनाम्ना एकश्रुत्या पठ्यते। ततोऽयमाद्युदात्तोऽन्तोदात्तश्च [5]निपात्यते। इक्ष्वाकोः अपत्यम्, 'जनपदशब्दात् क्षत्रियादञ्' (४.१.१६६/११८२) इति अञ्, [6]तत्र उकारलोपो निपात्यते। ऐक्ष्वाकः। इक्ष्वाकुषु जनपदेषु भवः, 'कोपधादण्' (४.२.१३२/१३५६) इत्यण्। ऐक्ष्वाकः[7]।

मैत्रेय इति। मित्रयुशब्दो गृष्ट्यादिषु (४.१.१३६/११४३) पठ्यते, ततो [8]ढञि कृते यादेरियादेशापवादो युशब्दलोपो निपात्यते। मित्रयोरपत्यं मैत्रेयः।

---

1. दाण्डिनायन – निपात्यन्ते नास्ति फ. 2. बसन्तादौ फ. 3. भ्रूणहत्ये ह. 4. यूशब्दलोपो ह. 5. इष्यते फ.ह. 6. तत्र – अण् नास्ति फ. 7. इति इत्यधिकम् फ. 8. ढञि कृते नास्ति फ.